श्री कूर्म स्तोत्रं (कूर्मपुराणे)

श्री कूर्म स्तोत्रं (कूर्मपुराणे)

मुनयः ऊचुः |
नमस्ते कूर्मरूपाय विष्णवे परमात्मने |
नारायणाय विश्वाय वासुदेवाय ते नमः || 1 ||

नमो नमस्ते कृष्णाय गोविंदाय नमो नमः |
माधवाय नमस्तुभ्यं नमो यज्ञेश्वराय च || 2 ||

सहस्रशिरसे तुभ्यं सहस्राक्षाय ते नमः |
नमः सहस्रहस्ताय सहस्रचरणाय च || 3 ||

ॐ नमो ज्ञानरूपाय परमात्मस्वरूपिणे |
आनंदाय नमस्तुभ्यं मायातीताय ते नमः || 4 ||

नमो गूढशरीराय निर्गुणाय नमोऽस्तु ते |
पुरुषाय पुराणाय सत्तामात्रस्वरूपिणे || 5 ||

नमः सांख्याय योगाय केवलाय नमोऽस्तु ते |
धर्मज्ञानाधिगम्याय निष्कलाय नमोऽस्तु ते || 6 ||

नमस्ते व्योमरूपाय महायोगेश्वराय च |
परावराणां प्रभवे वेदवेद्याय ते नमः || 7 ||

नमो बुद्धाय शुद्धाय नमो युक्ताय हेतवे |
नमो नमो नमस्तुभ्यं मायिने वेधसे नमः || 8 ||

नमोऽस्तु ते वराहाय नारसिंहाय ते नमः |
वामनाय नमस्तुभ्यं हृषीकेशाय ते नमः || 9 ||

स्वर्गापवर्गदात्रे च नमोऽप्रतिहतात्मने |
नमो योगाधिगम्याय योगिने योगदायिने || 10 ||

देवानां पतये तुभ्यं देवार्तिशमनाय ते |
भगवंस्त्वत्प्रसादेन सर्वसंसारनाशनं || 11 ||

अस्माभिर्विदितं ज्ञानं यज्ज्ञात्वामृतमश्नुते |
श्रुतास्तु विविधा धर्मा वंशा मन्वंतराणि च || 12 ||

सर्गश्च प्रतिसर्गश्च ब्रह्मांडस्यास्य विस्तरः |
त्वं हि सर्वजगत्साक्षी विश्वो नारायणः परः |
त्रातुमर्हस्यनंतात्मा त्वामेव शरणं गताः || 13 ||

इति कूर्मपुराणे उत्तरभागे षट्चत्वारिंशोऽध्याये मुनिभिः कृतं श्री कूर्म स्तोत्रं |